# M.A. (Part–II) Examination
## SANSKRIT
## Paper—II
## (Natyashastra & Natak)

Time : Three Hours] [Maximum Marks : 100

**सूचना** : उत्तराणि स्वीकृतभाषयामेव लिखत।

**(दशरूपकम्)**

1. कारिकात्रयं स्पष्टीक्रीयताम् : 15

(1) क्रोधेनावमृशेद्यत्र व्यसनाद्वा विलोभनात्।
गर्भनिर्भिन्नबीजार्थः सोऽवमर्श इति स्मृतः।।

(2) अर्थोपक्षेपकैः सूच्यं पञ्चभिः प्रतिपादयेत्।
विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकैः।।

(3) विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वाद्यत्वं स्थायी भावो रसः स्मृतः।।

(4) भारतीसंस्कृतप्रायो वाग्व्यापारो नटाश्रयः।
भेदैः प्ररोचनायुक्तैर्वीथीप्रहसनामुखैः।।

(5) चिन्तानिःश्वासखेदाश्रुवैवर्ण्यग्लान्यभूषणैः।
युक्ताः षडन्त्या द्वे चाद्ये क्रीडौज्ज्वल्यप्रहर्षितैः।।

2. (अ) टिप्पणीत्रयं लिखत : 15

(1) हास्य-रसः
(2) योषिदलङ्काराः
(3) कथावस्तुभेदाः
(4) भाणः
(5) नायकस्य सात्विकगुणाः।

(ब) मुखसन्ध्यङ्गानि स्पष्टीकुरुत। 10

अथवा

कैशिकीवृत्तेः विवरणं लिखत।

**(नाट्यशास्त्रम्)**

3. (अ) श्लोकद्वयस्य विवेचनं कुरुत : 10

(1) एवं रङ्गशिरः कृत्वा दारुकर्म प्रयोजयेत्।
ऊहप्रत्यूहसंयुक्तः नानाशिल्पप्रयोजितम्।।

(2) नेपथ्यगृहकं चैव ततः कार्यं प्रयत्नतः।
द्वारं चैकं भवेत्तत्र रङ्गपीठप्रवेशनम्।।

(3) विकृष्टश्चतुरस्रश्च त्र्यस्रश्चैव तु मण्डपः।
तेषां त्रीणि प्रमाणानि ज्येष्ठं मध्यं तथाऽवरम्।।

(ब) टिप्पणीद्वयं लिखत : 10

(1) मत्तवारणी
(2) षट्दारुकम्
(3) स्तम्भस्थापनम्
(4) सूत्रप्रसारणम्।

(उत्तररामचरितम्)

4. (अ) त्रयाणां ससंदर्भसविवरणमनुवादं लिखत : 15

(1) अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि।
जनस्थाने शून्ये विकलकरणैरार्यचरितै
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।

(2) प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः।
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते।।

(3) वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे।
नचखलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति च तयोर्भूयान् भेदः फलं प्रति यद्यथा।
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदां चयः।।

(4) ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः।
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः।
पुनरिदमयं देवो रामः स्वयं वनमागतः।

(5) पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः।
शब्दब्रह्मविदः कवेः परिणतप्राज्ञस्य वाणीमिमाम्।।

(ब) वाक्यद्वयस्य ससंदर्भस्पष्टीकरणं कुरुत 10

(1) जृम्भते जृम्भकास्त्रम्
(2) लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति।
(3) पुटपाकप्रतीकाशो रामस्य करुणो रसः।
(4) तीर्थोदकञ्च वह्निश्च नान्यतः शुद्धिमर्हतः।

5. टिप्पणीत्रयं लिखत : 15

(1) गर्भाङ्कः
(2) कौसल्याजनकयोगः
(3) चन्द्रकेतुः
(4) चित्रदर्शनम्।

**अथवा**

'कारुण्यं भवभूतिरेव तनुते।' इति स्पष्टीकुरुत।